# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

| | | |
|---|---|---|
| **कक्षा – आचार्य: (SEM-2)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – पुराणेतिहासः | **कोड –C.E.4.2.2** | समयः - 11 तः 2 पर्यन्तम् |
| दिनाङ्कः –15/04/2019 | सन्दर्भग्रन्थः – श्रीविष्णुपुराणम् 1-3 अंशाः | |

---

**प्रथमान्विति: (Unit-1)**

**प्रश्नः-1 कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः।
तमेवार्थस्वरूपेण भाति दर्शनतः स्थितम्॥

(2) प्रहरन्ति महात्मानो विपक्ष्य अपि नेदृशे।
गुणैः समन्विते साधौ किं पुनर्यः स्वपक्षजः॥

**प्रश्नः-2 चतुर्विंशतितत्त्वविवेचनपूर्वकं जगदुत्पत्तिवर्णनं यथाग्रन्थं निरूपयत।** **10**

**अथवा**

**राज्ञः वेनस्य पृथोश्च चरित्रं सविस्तरं विवेचयत।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) जन्म बाल्यं ततः सर्वो जन्तुः प्राप्नोति यौवनम्।
अन्याहतैव भवति ततोऽनुदिवसं जरा॥

(2) अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।
यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूमयः॥

**प्रश्नः-4 प्रह्लादकृतभगवत्स्तुतिं यथाग्रन्थं विवेचयत।** **10**

**अथवा**

**भूगोलवर्णनं यथाग्रन्थं निरूपयत।**

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः-5 कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहितः॥

(2) सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित्।
अपश्यत्स च मैत्रेय आत्मानं प्रकृतेः परम्॥

**प्रश्नः-6 सप्तोर्ध्वलोकानां वृत्तान्तं सविस्तरं निरूपयत।** **10**

**अथवा**

**भरतचरित्रं यथाग्रन्थं लिखत।**

**प्रश्नः-7 कस्यचिदेकस्य ससन्दर्भसप्रसङ्गपूर्वकं व्याख्या कार्या।** **05**

(1) सर्वे च देवा मनवस्समस्तास्सप्तर्षयो ये मनुसूनवश्च।
इन्द्रश्च योऽयं त्रिदशेशभूतो विष्णोर्शेषस्तु विभूतयस्ताः।।

(2) अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।।

**प्रश्नः-8 गृहस्थसम्बन्धिसदाचारवर्णनं यथाग्रन्थं लिखत।** **10**

**अथवा**

**विष्णुपुराणे वर्णितं श्राद्धविधिं निरूपयत।**

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) विष्णुपुराणे प्रथमांशे कति अध्यायाः?
(2) पराशरस्य पितामहः कः अस्ति?
(3) विष्णुपुराणानुसारं कति तत्त्वानिसन्ति?
(4) अहोरात्रं कति मुहूर्तात्मकं भवति?
(5) कस्याः अपरं नाम भार्गवी अस्ति?
(6) मरीचेः पत्न्याः नाम किम्?
(7) ध्रुवस्य मातुः नाम किम्?
(8) सप्तद्वीपानां नामानि लिखत।
(9) अतलादिसप्तलोकानां नामानि लिखत।
(10) एकादशतमः मनुः कः बभूव?
(11) ब्रह्मरात सुतः कः?
(12) विवाहसंस्कारस्य कति प्रकाराः?
(13) श्राद्धशब्दस्य व्याख्या का?
(14) आद्यपुरुषः कः?
(15) विष्णुपुराणे तृतीयांशे कति अध्यायाः?